षिंचति वीर्येण वा एताः स्यंदमानानां प्रतीपं स्यंदते वीर्येणो वैन ८८

मेतदभिषिंचत्येता वा एका आपस्ता एवैतत्संभरति ॥२॥ अथापय
तीर्गृह्णात्यापः परिवाहिणी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहापः
परिवाहिणी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिंचत्य
तस्यै वा एषापच्छिद्यैवं पुनरन्नेवत्यपि ह वा ऽअस्यान्यराष्ट्री
यं राष्ट्रमवत्युप्यन्यराष्ट्रीयं संवहरंते तयास्मिन्नमानं दध
ष्या राष्ट्रमवत्युप्यन्यराष्ट्रीयं संवहरंते

Indira Gandhi National
Centre for the Arts

त्ति नुसैवैनमेतदभिषिंचत्येतावाएकाऽआपस्ताऽएवैतत्संनर
ति॥९॥ अथनदीपतिंगृह्णाति। अपांपतिरसिराष्ट्रदाराष्ट्रंमेदे
हिस्वाहापांपतिरसिराष्ट्रदाराष्ट्रममुष्मैदेहीतितान्निरन्निषिं
चत्यपांवाएषपतिर्यंनदीपतिर्विशामेवैनमेतत्पतिंकरोत्ये
तावाएकाऽआपस्ताएवैतत्संनरति॥१०॥ अथनिवेष्यंगृह्णा १९

ति। अपांगर्भोसिराष्ट्रदाराष्ट्रंमेदेहिस्वाहापांगर्भोसिराष्ट्रदाराष्ट्र
ममुष्मैदेहीतितान्निरन्निषिंचतिगर्भंवाएतदापऽउपनिवेष्टंते
विशामेवैनमेतद्गर्भंकरोत्येतावाएकाऽआपस्ताएवैतत्संन
रति॥११॥ अथयःस्यंदमानानांस्थावरोह्रदोभवतिप्रत्या
तापेतागृह्णातिसूर्यत्वचसस्थराष्ट्रदाराष्ट्रंमेदत्तस्वाहासूर्य

त्वचसस्थराष्ट्रदाराष्ट्रममुष्मै दत्तेतिताभिरभिषिंचतिवर्चसेवैन
मेतदभिषिंचतिसूर्यत्वचसमेवैनमेतत्करोतिवृष्ण्यावाएताआपो
भवंतियाःस्यंदमानानांनस्यंदंतेवृष्णसानोवाएषयद्राजंस्य
यंतस्मादेताभिरभिषिंचत्येतावाऽएकाआपस्ताएवैतत्संभर
ति॥१२॥अथयाआतपतिवर्षंतिताग्रह्णातिसूर्यवर्चसस्थरा ९०

ष्ट्रदाराष्ट्रंमेदत्तस्वाहासूर्यवर्चसस्थराष्ट्रदाराष्ट्रममुष्मैदत्ते
तिताभिरभिषिंचतिवर्चसेवैनमेतदभिषिंचतिसूर्यवर्चसमे
वैनमेतत्करोतिमेध्यावाएताआपोभवंतियाआतपतिवर्षं
त्यप्राप्ताहीमांभवंत्यथैनाग्रह्णातिमेध्यमेवैनमेतत्करो
त्येवाएकाआपस्ताऽएवैतत्संभरति॥१३॥अथवैशंतीर्ग

Indira Gandhi National
Centre for the Arts

स्नाति। मांदास्स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा मांदास्स्थ राष्ट्रदा राष्ट्रम
मुष्मै दत्तेति तान्निरन्निषिंचति त्रिर्वाम एवास्मा एतच्छ्रावरामन्न
पक्रमिणीं करोत्येतावा एकाष्टापस्त्वा एवैतत्संनरति॥२४॥कौ
डस्याद्भिः॥शातपथस्याद्भिः॥ अथ कूप्या गृह्णाति। व्रडाह्रितस्थ
राष्ट्रदा राष्ट्रं मे दत्त स्वाहा व्रडाह्रितस्थ राष्ट्रदा राष्ट्रममुष्मै दत्ते रौ१

ऽ
तितान्निरन्निषिंचति तद्याः इमां परेणापस्त्वा एवैतत्संनरत्येषा
मुद्वैव सर्वत्वाय तस्मात्तान्निरन्निषिंचत्येतावा ऽएकाष्टा
पस्त्वा ऽएवैतत्संनरति॥२५॥ अथ प्रुष्वा गृह्णाति। व्राशास्स्थ रा
ष्ट्रदा राष्ट्रं मे दत्त स्वाहा व्राशास्स्थ राष्ट्रदा राष्ट्रममुष्मै दत्ते
तितान्निरन्निषिंचत्यन्नाद्यं वै नमेतद्न्निषिंचत्यन्नाद्यमेवा

तिऽ

Indira Gandhi National
Centre for the Arts

स्मिन्नेतद्दधातीदं वा ऽअसावादित्य ऽउद्यंन्नेव यथायमग्निर्निर्द्द
हेदेवमोषधीरन्नाद्यं निर्द्दहति तदेता ऽआपोऽन्यवयत्यः शम
यंति न ह वा ऽइहान्नाद्यं परिशिष्येत यदेता ऽआपो नाभ्यवेयुर
न्नाद्यमेवैनमेतदभिषिंचत्येता वा ऽएका ऽआपस्ता ऽएवैतत्सं
नरति ॥१६॥ अथ मधु गृह्णाति । रा विश्वास्थ राष्ट्रदा राष्ट्रं मे दत्त ६२

स्वाहा मु विश्वास्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति । तान्निरन्निषिंच
त्यपां वै वैनमेतदोषधीनां व रसेनाभिषिंचत्येता वा ऽएका ऽआ
पस्ता ऽएवैतत्संनरति ॥१७॥ अथ गोर्विजायमानाया ऽउल्बा
द्गृह्णाति । त्रा ऽकरी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा त्रा ऽकरी स्थ राष्ट्र
दा राष्ट्रममुष्मै दत्तेति तान्निरन्निषिंचति पशु निरेवैनमेतद

Indira Gandhi National
Centre for the Arts

न्निषिंवत्येतावाएका आपस्ताएवैतत्संनरति॥१८॥ अथप्रयोग
ह्लाति। ऊनन्नतस्थराष्ट्रदाराष्ट्रंमेदत्तस्वाहा ऊनन्नतस्थराष्ट्रदा
राष्ट्रममुष्मैदत्तेति। तान्निरन्निषिंचतिपशुन्निरेवैनमेतदन्निषिंव
त्येतावाएका आपस्ताएवैतत्संनरति॥१९॥ अथघृतंगरह्ला
ति। विश्वभृतस्थराष्ट्रदाराष्ट्रंमेदत्तस्वाहा। विश्वभृतस्थराष्ट्र ९३

दाराष्ट्रममुष्मैदत्तेति। तान्निरन्निषिंचतिपशूनामेवैनमेतद्
सेनान्निषिंचत्येतावाएका आपस्ताएवैतत्संनरति॥२०॥
अथमरीचीः। अंजलिनासंगृह्यापिसृज्यापःस्वराजस्थ
राष्ट्रदाराष्ट्रममुष्मैदत्तेत्येतावा आपःस्वराजोयन्मरीच
यस्तायत्स्पंदंतइवान्योन्यस्याएवैतच्छ्रियाअतिष्ठमानाः

Indira Gandhi National
Centre for the Arts

त्तराधराइवन्नवंस्योयंतिस्वाराज्यमेवास्मिन्नेतद्दधात्येतावा
एका आपस्ता एवैतत्संभरति॥२१॥ता वा एताः। सप्तदशापः
संभरति सप्तदशो वै प्रजापतिः प्रजापतिर्यज्ञस्तस्मात्सप्तद
शापः संभरति॥२२॥षोडशैता आपोऽभिजुहोति षोड
शाहुतीर्जुहोति ताद्वात्रिंशास्तै द्वयी पुनर्जुहोति सारस्वतीषु ९४

वमरी।विप्रुवतांश्चतुस्त्रिंशात्रयस्त्रिंशद्वै देवाः प्रजापतिश्च
तुस्त्रिंशस्तदेनं प्रजापतिं करोति॥२३॥अथ यद्रूवाद्रूवाग
ह्णाति॥वज्रो वा आज्यं वज्रेणैवैतदाज्येन स्पृत्वा स्पृत्वा स्वी
कृत्य गृह्णाति॥२४॥अथ यत्सारस्वतीषु नर्जुहोति॥वाग्वै
सरस्वती वज्र आज्यं नद्वज्रेणाज्येन द्वाचं हिनस्सानीति त

मुखमेभवत्यथयान्युपरिष्टादभिषेकस्यजुहोतीद्वेतेषांप्रथमे
भवतिब्रह्मवैबृहस्पतिरिंद्रियंवीर्यमिंद्रएताभ्यामेवैनमे
तदुभाभ्यामुभयतःपरिबृंहति॥७॥सजुहोति।यानिपुर
स्तादभिषेकस्यजुहोत्यग्नयेस्वाहेतितेजोवाअग्निस्तेजसै
वैनमेतदभिषिंचतिसोमायस्वाहेतिक्षत्रंवैसोमःक्षत्रेणै ९८

वैनमेतदभिषिंचतिसवित्रेस्वाहेतिसवितावैदेवानांप्रसवितासवि२
तृप्रसूतएवैनमेतदभिषिंचतिसरस्वत्यैस्वाहेतिवाग्वैस
रस्वतीवाचैवैनमेतदभिषिंचतिपूष्णेस्वाहेतिपशवोवैपूषा
पशुभिरेवैनमेतदभिषिंचतिबृहस्पतयेस्वाहेतिब्रह्मवै
बृहस्पतिर्ब्रह्मणैवैनमेतदभिषिंचत्येतानिपुरस्तादभिषे

Indira Gandhi National
Centre for the Arts

कस्यकुहोतितान्येतान्यग्निनामानीत्याचक्षते॥८॥ अथकुहो
ति॥ यान्युपरिष्टादग्निषेकस्यकुहोतीन्द्रायस्वाहेतिवीर्यंवाइं
द्रोवीर्यणैवेनमेतदग्निषिंचतिघोषायस्वाहेतिवीर्यंवैघो
षोवीर्यणैवेनमेतदग्निषिंचतिश्लोकायस्वाहेतिवीर्यंवैश्लो
कोवीर्यणैवेनमेतदग्निषिंचत्यंशायस्वाहेतिवीर्यंवाअं

शोवीर्यणैवेनमेतदग्निषिंचतिभगायस्वाहेतिवीर्यंवैभ
गोवीर्यणैवेनमेतदग्निषिंचत्यर्यम्णेस्वाहेतितदेनमेस्यसर्व
स्यार्यमणंकरोत्येतान्युपरिष्टादग्निषेकस्यकुहोतितान्ये
तान्यादित्यनामानीत्याचक्षते॥९॥ अथैनमैत्रावरुणस्य
धिष्ण्ये। अग्निषेवनीयानिपात्राणिभवंतिघृत्रैताऽऽआ

Indira Gandhi National
Centre for the Arts

पोभिषेचनीया भवंति।२०॥ पालाशं भवति। तेन ब्राह्मणोभि
षिंचति ब्रह्म वै पलाशो ब्रह्मणैवैनमेतदभिषिंचति॥२१॥
औदुंबरं भवति। तेन स्वोभिषिंचत्यन्नं वा ऊर्गुदुंबर ऊर्ग्वै
स्वं यावद्वै पुरुषस्य स्वं भवति नैव तावदशनायति तेनोर्क्स्वं
तस्मादौदुंबरेण स्वोभिषिंचति॥२२॥ नैयग्रोधपादं भवति॥ १००

तेन मित्रो राजन्योभिषिंचति पद्भिर्वै न्यग्रोधः प्रतिष्ठितो मि
त्रेण वै राजन्यः प्रतिष्ठितस्तस्मान्नैयग्रोधपादेन मित्रो रा
जन्योभिषिंचति॥२३॥ आश्वत्थं भवति। तेन वैश्योभिषिंचति
स ष्वद्देवा दोश्वत्थे तिष्ठत इंद्रो मरुत उपामंत्रयंत तस्मादा
श्वत्थेन वैश्योभिषिंचत्येतान्यभिषेचनीयानि पात्राणि भव

ति॥१८॥ अथ पवित्रे करोति। पवित्रे स्थो वैष्णव्याविति सोऽसावे
व बंधुस्तयोर्हिरण्यं प्रवयति ताभ्यामेता अग्निहोत्रनीया
अप उत्पुनाति तद्यद्धिरण्यं प्रवयत्यमृतमायुर्हिरण्यं तदा
स्वमृतमायुर्दधाति तस्माद्धिरण्यं प्रवयति॥१९॥ अथोत्पुना
ति॥ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य १.१

रश्मिभिरिति सोऽसावेव बंधुरनिभृष्टमसि वाचो बंधुस्त
पोजा इत्यनाधृष्टमसि वाचो बंधुस्तपोजा इत्यनाधृष्ट ह्येवैतद्दाह यदाह
निभृष्टमसीति वाचो बंधुरिति वाव है प्राणो ह्यापो नवं
ति तावद्वाचा वदति तस्मादाह वाचो बंधुरिति॥२०॥ तपो

जा इति ॥ अग्नेर्वै धूमो जायते धूमादभ्रमभ्राद्वृष्टिरग्नेर्वा
एता जायंते तस्मादाह तपोजा इति ॥ २७ ॥ सोमस्य दात्रमसी
ति । यदा वा एनमेतान्निरस्निषु एवं स्य थाहुतिर्भवति तस्मादा
ह । सोमस्य दात्रमसीति स्वाहाराडस्व इति तदेनाः स्वाहा १०२
कारेणैवोत्सृनाति ॥ २८ ॥ ता एतेषु पात्रेषु व्यानयति स धर्मा

प ५८

होत्रकामिनी राधा एता इत्यनतिमानिन्य इत्येवैतदाह स ध
मा द इति धामभिनी राप एता इति हीर्यवत्य इत्येवैतदाह
नाधृष्टा अपस्या वसाना इत्यनाधृष्टा ह्यस्त्वर स्तोत्रिरित्ये
वैतदाह यदाहानाधृष्टा अपस्यो वसाना इति पस्त्यासु
चक्रे वरुणः सधस्थमिति विशो वै पस्त्या विद्धु चक्रे वरु

प॰

णः प्रतिष्ठामित्येवैतदाह। पाᳮ शिशुर्मा हिंतमास्वंतरित्यपां वाऽए
ष शिशुर्भवति यो राजसूयेन यजते तस्मादाह। पाᳮ शिशुर्मा हिंतमा
स्वंतरिति॥१९॥ अथैनं वासाᳮसि परिधापयति। तुत्राप्यमिति वा
सो भवति तस्मिं सर्वाणि यज्ञरूपाणि निष्यूतानि भवंति तदेनं परि
धापयति वृत्रस्योल्बमसीति तद्यदेव वृत्रस्योल्बं तत एवैनमे १२
पू

तज्जनयति॥२०॥ अथैनं पाडूं परिधापयति। वृत्रस्य जराय्वसीति
तद्यदेव वृत्रस्य जरायु तत एवैनमेतज्जनयति॥२१॥ अथाधीवा
सं प्रतिमुंचति। वृत्रस्य योनिरसीति तद्येव वृत्रस्य योनिस्त
स्याऽएवैनमेतज्जनयति॥२२॥ अथोष्णीषᳮ सᳮहृत्यापुरस्ता
दवगूहति। वृत्रस्य नाभिरसीति तद्येव वृत्रस्य नाभिस्तामे

Indira Gandhi National
Centre for the Arts

वाऽस्मिन्नेतद्दधाति॥२३॥तद्धैके। समंतंपरिवेष्टयंतिनाग्निर्वाऽ
स्यैवासमंतंवाऽइदंनाग्निः पर्येतीतिवदंतस्तदुतथानकुर्यात्पु
रस्तादेवावगूहेत्पुरस्ताद्धीयंनाग्निस्तद्यदेनंवासांऽसिपरिधा
पयतिऽनयत्येवैनमेतज्ज्ञातुमग्निर्षिषिवानीतितस्मादेनंवासा
ऽंसिपरिधापयति॥२४॥तद्धैके।निदधत्येतानिवासांऽस्य १८

येनंपुनर्दीक्षितवसनंपरिधापयंतितदुतथानकुर्यादंगानिवा
अस्यऽजनूर्वासांऽसिस्यांगेहैनंऽसऽद्वातन्वाव्यर्द्धयतिवरुण्यं
वोदीक्षितवसनंऽसएतेषामेवैकंवाससांपरिदधीततदेन
मंगैर्नुद्वातन्वास्मर्द्धयतिवरुण्यंदीक्षितवसनंतदेनंवरुणा
द्दीक्षितवसनात्प्रमुंचति॥२५॥सयत्रावभृथमभ्यवैति।तदे

Indira Gandhi National
Centre for the Arts

तदयस्माद्वहरंतितस्माल्लोमक्रियतेस एतेषामेवैकं दासस्यापु
रिघायोदैतितानिद्वस्यायैवद्वपायाऽकृतायां दद्यादुदवसा
नायायांभेषो॥२६॥अथधनुरश्चितनोत्रीइंद्रस्यवार्त्रघ्नमसी
तिवार्त्रघ्नंवैधनुरिंद्रोवैयजमानोद्वयेनवाएषइंद्रोभवतिय
ब्रह्मक्षत्रियोयद्युयजमानस्तस्मादाहेंद्रस्यवार्त्रघ्नमसीति॥२७॥ १०५

स्पृशवाद्विमार्ष्टि।मित्रस्यासिवरुणस्यासीतिबाहूवैधनु
र्बाहुन्याविराजन्योमैत्रावरुणस्तस्मादाहमित्रस्यासिवरुणस्या
सीतितदस्मैप्रयच्छतित्वयायंवृत्रंवधेदितित्वयायंद्विषंतंभ्रा
तृव्यंवधेदित्येवैतदाह॥२८॥अथास्मैतिस्रइषूःप्रयच्छति।
सउपयाप्रथमयासमर्पयतिनपरानुन्तिसेकासइयंपृथिवी

Indira Gandhi National Centre for the Arts

सैषा द्वानामाध्ययथा विद्वः शयित्वा ऽवति वाग्नि युते वा सा द्विती
यातदिदं मंतरिक्षं ॥ सैषा रुद्रानामाध्ययथा पेव राध्योति सा तृती
या सा यो द्यौः सैषा कुमा नामैताहि वेति स्त्र इष वस्तस्माद सौति
स्त्र इष्टः प्रयच्छति ॥ २९ ॥ तः प्रयच्छति ॥ पात्तैनं प्रांवं पा तैनं प्रत्यं
वं पात्तैनं तिर्यं वं दिश्याः पात्तितं स्वे स्ववीए वदिक्षो ग्वारव्याः करो ९६
द

तित द्यदस्मै चक्षुः प्रयच्छति वीर्यं वा एतद्वा ऽन्यस्य यद्दू चक्षुर्वीर्यं
वं तिम लिषिं वा नातितस्माद्वा अस्मा आयुधं प्रयच्छति ॥ ३० ॥ अ
थे नमा विदो ग्वावयति आविर्मर्या इत्यनिरुक्तं प्रजापतिर्वा अ
निरुक्तस्तदेनं प्रजापतये ऽआवेदयति सो ऽस्मै सवमनुमन्य
तेनेनानुमतः सूयते ॥ ३१ ॥ आवित्तो ऽग्निर्गृहपतिरिति ब्रह्म

Indira Gandhi National
Centre for the Arts

वा अग्निस्तदेनं ब्रह्मण आवेदयति तदस्मै सवमनुमन्यते त
नानुमतः सूयते ।३२॥ अर्द्धप्रपाठकः ६॥ आवित्त इंद्रो वृद्धश्रवा
इति ॥ क्षत्रं वा इंद्रस्तदेनं क्षत्रायावेदयति तदस्मै सवमनुमन्य
ते तेनानुमतः सूयते ॥३३॥ आवित्तौ मित्रावरुणौ धृतव्रतावि
ति ॥ प्राणोदानौ वै मित्रावरुणौ तदेनं प्राणोदानाभ्यामावेदय २०

ति तावस्मै सवमनुमन्येते ताभ्यामनुमतः सूयते ।३४॥ आवि
त्तः पूषा विश्ववेदा इति । पशवो वै पूषा तदेनं पशुभ्य आवेदय
ति तस्मै सवमनुमंन्यंते तैरनुमतः सूयते ॥३५॥ आवित्ते द्या
वापृथिवी विश्वशंभुवाविति । तदेनमाभ्यां द्यावापृथिवीभ्या
मावेदयति ते अस्मै सवमनुमन्येते ताभ्यामनुमतः सूयते ३६॥

Indira Gandhi National Centre for the Arts

न्मा॥ विज्ञादित्तिर रुद्रामुते॥ इयं वै दधिकृदितिस्तुदेनमस्यैट्धिमा
ज्ञावेदयंति सा सोस्य सर्वमनुमन्यते तयानुमतः सृयते तद्यान्यए
वैनमेतद्देवताभ्य आवेदयति॥ अस्मै सर्वमनुमन्यंते तान्निरु
नुमतः सृयते॥ ३॥ आलंतां॥ २॥ अध्यायः॥॥ केशानुस्यपुरुष १८
स्या लोहायसमास्या त्रीविधमनुवेणादं दशक्रादुतिसर्वावाएष

॥

मत्स्रातिमुच्यते सुवार्न्वधान्यो राडसूयेन यजते तस्याङ्करैवु
मत्लुर्नेवतितद्युमर्त्यर्कबविधस्तमुवैतदुतिनयति बद्धंदस्तु
काशा॥ अथ यत्केशानुस्य पुरुषस्यानवाएष स्त्रीनपुमा
न्यकेशावः पुरुषो बदहपुमांस्तेन न स्त्री बदुकेशावस्तेनो
नपुमां नैतदुयोनाहिरण्यं बध्नीहाय सान्नेत त्रिमयो नाकि

मयो बृहदंदस्य का सुथमुक्ष्वो हाय संतुवति लोहिता नाइव हिदंदस्य
कास्तुस्मा केशावुस्य पुरुषस्य ॥२॥ अथैनं दिशः समारोहय
ति। प्राचीमारोह गायत्री त्वावतु रथंतरꣳ साम त्रिवृत्स्तोमो व
संत ऋतुर्ब्रह्म द्रविणं ॥३॥ दक्षिणामारोह। त्रिष्टुप्त्वावतु बृहत्सा
म पंचदशस्तोमो ग्रीष्म ऋतुः क्षत्रं द्रविणं ॥४॥ प्रतीचीमारोह ॥ १९

जगती त्वावतु वैरूपꣳ साम सप्तदशस्तोमो वर्षा ऽ ऋतुर्विड् द्रवि
णं ॥५॥ उदीचीमारोह। अनुष्टुप्त्वावतु वैराजꣳ साम एकवि
ꣳश स्तोमः शरद ऋतुः फलं द्रविणं ॥६॥ ऊर्ध्वामारोह। पंक्तिस्त्वा रो
वतु शाक्कररैवते सामनी त्रिणवत्रयस्त्रिꣳशौ स्तोमौ हे
मंतशिशिरावृतू वर्चो द्रविणमिति ॥७॥ तद्यदेनं दिशः समा

Indira Gandhi National Centre for the Arts

रोहयति।स्वर्नाम वैतद्रूपं यत्स्त्रीन्नेवैनमेतत्संवत्सरं समारो
हयति स यत्स्त्रीं संवत्सरं समारुह्य सर्वमेवेदमुपर्युपरि
वत्यर्वाग्वास्य इदं सर्वं भवति॥८॥शार्दूलचर्मणोऽध
नाट्युसीसं निहितं भवति।तत्पदा प्रत्यस्यति प्रत्यस्तं नमुचेः
शिरइति नमुचिर्ह वै नामासुर आस तमिन्द्रो विव्याध तस्य २९०
नि

स्य पदाभिरोऽभितष्ठौ स यदभिष्ठित उदबाधत स उच्छुङ्कस्तस्य
पदा शिरः प्रच्छिच्छेद ततो रक्षः समभवत्तद्धैनमनुनाषते
कगमिष्यस्युच्छङ्क मे मोच्यसइति॥९॥तस्मासीसेनापङ्घानात्
स्मात्सीसं मृदु सत्तदुवद्धि सर्वं वैरा हि वीर्येणापङ्घानात्तस्मा
द्धिरण्यरूपं सन्न किंयद्गुनाहैतैस्तदुवद्धि सर्वं वैरा हिवी

र्येणापङ्क्घान्तस्माद्विशापरूपः सन्नक्रियत्रमाहैतिसैङ्कवंद्वि
सर्वेषांहि वीर्येणापङ्क्घान्तद्वेसतं नांष्ट्रारक्षाः स्यपङ्क्घान्
तथ्योएवैषएतंनाष्ट्रापरक्षाः स्यतोाहंति॥१०॥ अथैनंशार्दूल
लचर्मारोहयति। सोमस्यत्विषिरसीतियत्रवैसोमइंद्रमत्यप
वततस्यत्ततः शार्दूलः समभवत्तेनसोमस्यत्विषिस्तस्मादा १११

ह सोमस्यत्विषिरसीतितवेवमेत्विषिर्भूयादितिशार्दूलत्वि
षिमेवास्मिन्नेतद्दधातितस्मादाहतावेवमेत्विषिर्भूयादिति
॥११॥ अथास्यरुक्ममधस्तादुपास्यति।मृत्योःपाहीत्यमृतमायु
र्हिरण्यंतदमृतआयुषिप्रतितिष्ठति॥१२॥ अथरुक्मः शा
तत्तिमिष्टोवाप्नवति। नवविद्मावासस्यदिशातविद्वाः

Indira Gandhi National Centre for the Arts

शतात्पुर्व्यात्रयंपुरुषः शततेजाः शतवीर्यस्तस्माच्छतविद्वस्यायु
घनविदितस्तोनवेमेपुरुषेप्राणास्तस्मान्नववित्त्वसः॥१३॥तस्तु
परिष्वाष्टौस्तौनिदधंतितुंडोसिस्वहोस्यमृतमसीत्यमृतमा
युर्हिरण्यंतदस्मिन्नमृतमायुर्दधातितदुक्ताऽन्नयतोनुव
लामृतमायुर्हिरण्यंपतदमृतेनैवैनमेतदायुषान्नयतःपरिवृं ११२

तितितस्मादुक्ताऽमयतोन्नवतः॥१४॥अथवाहसउद्दालाति॥
हिरण्यरूपाऽपसोविरोकऽन्नाविद्राउदियःस्सूर्यश्च।आ
रोहत्वरुणामित्रगर्त्तंतस्मुद्दाथ्यामदितिदितिवेलिबाह
विमित्रावरुणौपुरुषोगर्त्तस्तस्मादाहारोहतंवरुणामि
त्रगर्त्तमितितत्स्वद्दाथ्यामदितिदितिवेतितत्तःपरुपतवृं

Indira Gandhi National
Centre for the Arts

स्वं वा एतां बलयैतदाह ॥१५॥ नेत्ते त्रोड्हलीयात् । मित्रोऽसि वरु
णोसीत्येवोड्हलीयाद्वाहू वै मित्रावरुणौ बाहू स्यां वै राज
न्यो मैत्रावरुणस्तस्मान्मित्रोऽसि वरुणोऽसीत्येवोड्हलीया
त् ॥१६॥ तद्यदेनमूर्द्धबाहुमभिषिंचति । वीर्यं वा एतद्राजन्य
स्य यद्बाहू वीर्यं वा एतदपां रसः संभृतो भवति येनैनमभि ३१२

तदभिषिंचति नेन्म इदं वीर्यं वीर्यमपां रसः संभृतो बाहू हि
नादिति तस्मादेनमूर्द्धबाहुमभिषिंचति ॥१७॥ ब्राह्मणं ॥३॥
तं वै प्रांचं तिष्ठंतमभिषिंचति । पुरस्ताद्ब्राह्मणोऽभिषिंचत्य
ध्वर्युर्वा यो वास्य पुरोहितो भवति पश्चादितरे ॥१॥ सोमस्य
त्वा द्युम्नेनाभिषिंचामीति । वीर्यं वा एतदाहाग्नेर्भ्राजसेति वीर्य

Indira Gandhi National
Centre for the Arts

तोवैतदाहसूर्यस्यवर्च्चसेतिवीर्यायवैतदाहेंद्रस्येंद्रियेणे
तिवीर्यायवैतदाहक्षत्राणांक्षत्रपतिरेधीतिराज्ञामधिराड
एधीत्येवैतदाहातिदिद्यून्पाहीतीषवोवैदिद्यवइषुवधमे
वैनमेतदतिनयंतितस्मादाहातिदिद्यून्पाहीति॥२॥इमं
देवा॥असपत्नंसुवध्वमितीमंदेवाअभ्रातृव्यंसुव ११५

ध्वमितीमंदेवाअभ्रातृव्यंसुवध्वमित्येवैतदाहमहतेक्ष
त्रायमहतेज्यैष्ठ्यायेतिनात्रतिरोहितमिवास्तिमहतेजान
राज्यायेतिमहतेजनानांराज्यायेत्येवैतदाहेंद्रस्येंद्रिया
येतिवीर्यायेत्येवैतदाहयदाहेंद्रस्येंद्रियायेतीमममुष्य
पुत्रममुष्यैपुत्रमितितद्यदेवास्यजन्मततएवैतदाहस्वैवि

Indira Gandhi National
Centre for the Arts

त्राऽइतियस्यैविशोराजानंकुर्युएषवाऽअसौराजासोमोतस्मात्कंब्रा
ह्मणानाꣳराजेतितदस्माऽइदꣳसर्वमाद्यंकरोतिब्राह्मणामे
वापोद्धरतितस्माद्ब्राह्मणोनाद्यःसोमराजाहिभवति॥३॥
अथैतमग्निचेकीर्षत्यविषाणयानुविमृष्टेवीर्यंवाएतद १२५
याꣳरसःसंभृतोभवतियेनैनमेतदभिषिंचतीदंमेवीर्यꣳ

सर्वमात्मानमुपस्पृशादितितस्माद्वाऽअनुविमृष्टे॥४॥सो
नुविमृष्टेप्रपर्वतस्यचूभन्नस्यपृष्ठादितियथायंपर्वतो
तिष्ठावायथापर्वतःपश्चनतिष्ठावैवंवाएषऽइदꣳसर्वमतिति
ष्ठत्यवगिवास्मादिदꣳसर्वंभवतियोराजसूयेनयजतेत
स्माद्वाहप्रपर्वतस्यचूषन्नस्यपृष्ठान्नावक्षरंतिस्वस्तिवा

द्याना॥४॥ऽ आवर्त्तनं धरागुदक्ताऽहिर्बुध्न्यामनुरीमा
णा इति॥५॥ अथैनमंतरेव शार्दूलचर्मणि। विक्रमाऽक्रमस्य
ति विष्णोर्विक्रमणमसि विष्णोर्विक्रांतमसि विष्णोः क्रांत
मसीतीमवै लोका विष्णोर्विक्रमणं विष्णोर्विक्रांतं विष्णोः
क्रांतं तदिमानेव लोकान्समारुह्य सर्वमेवेदमुपर्युपरि २२८

भवत्यर्वा गे वास्मादिदं सर्वं भवति॥६॥ अथ ब्राह्मणस्य
पात्रे संस्रवान्समवनयति तद्ब्राह्मणं राजानमनुय
त्रः करोति तस्माद्ब्राह्मणो राजानमनुयत्रः॥७॥ तद्योस्य पु
त्रः प्रियतमो भवति। तस्मा एतत्पात्रं प्रयच्छतीदं मे यं वी
र्यं पुत्रो नुसंतनवदिति॥८॥ अथ प्रतिपरेत्य गार्हपत्यं म

त्वारथ्रेऽनुहोतिप्रजापतेनत्वदेतान्यन्यो विश्वारूपाणिपरि
ताबभूव॥यत्कामास्तेजुहुमस्तन्नोऽअस्त्वयममुष्यपितेति
तद्युः पुत्रस्तंपितरंकरोतियः पितातंपुत्रंतदेनयोर्वीर्यम्मु
तिषजत्यसावस्यपितेतितद्युः पितातंपितरंकरोतियः पु
त्रस्तंपुत्रंतदेनयोर्वीर्यमितिषजत्पुनरेवयथायथंकरो २१०

ति ब्रूयरुंस्यामपतयोरयीणां स्वाहेत्याशीरेवैषैतस्य क
र्मणऽआशिषमेवैतदाशास्ते॥८॥अथयएवसरुंस्रवोति
रिक्तोभवतितमाग्नीध्रीयेऽनुहोत्यतिरिक्तो वाऽएषस्रवरुंस्त्र
वोभवत्यतिरिक्तऽआग्नीध्रीयोगार्हपत्येहवीरुंषिश्रपयं
त्याहवनीयेऽनुह्वत्यथैषोऽतिरिक्तस्तद्व्यतिरिक्तऽएवैतदति

रिक्तं दधात्युत्तरार्द्धे जुहोत्येषा ह्येतस्य देवस्य देवस्य दिक्तस्या
स्मादुत्तरार्द्धे जुहोति स जुहोति रुद्र यत्ते क्रिविपरन्नाम तस्मिं
न्हुतमस्यमेष्टमसि स्वाहेति ॥१०॥ ब्राह्मणं ॥४॥ तद्धास्य
स्वोन्नवति। तस्य त्रातं वा परः स्त्राता वा गा उत्तरेणाहवनीयं
सुः स्नापयति तद्यदेवं करोति ॥१॥ वरुणाद्वा अभिषिषि ११८

चानात्तं इंद्रियं वीर्यमपचक्राम राष्ट्रस्य एषोपांरसः सोन्न
तोन्नवति यो नेन मेतदभिषिंचति सौत्रामण्येंद्रियं वीर्यं निर्ज्ञघान
तत्पशुष्वेवैविदन्तस्मात्पशवो यशो यदेष्वेवविदन्तस्मात्
पशुनु विद्येंद्रियं वीर्यं पुनरात्मन्नधत्त तथोएवैष एतन्नाहैवा
स्मान्विंद्रियं वीर्यमपचक्रामति वरुणासवो वा एष यद्राजसू

यमितिब्रूरुलोकरोदितित्वैवैषद्दजलकरोति ॥२॥ अथरथमुप
वहरति । यद्वैराजं न्यात्पुरा तिरथोनावेतदनुयुंक्ते तस्माद्र
थमुपावहरति ॥३॥ सउपावहरति । इंद्रस्यवज्रोसीतिवज्रोवै
रथोइंद्रोवैयजमानोद्वयेनवाएषइंद्रोभवतियच्चब्रह्मदत्त्रियोय
दुचयजमानस्तस्मादाहेंद्रस्यवज्रोसीति ॥४॥ तेमंतवैद्यन्य ११९

वरुणयुनक्तिमित्रावरुणयोस्त्वाप्रशास्त्रोःप्रशिषायुनज्मी
तिबाहूवैमित्रावरुणौबाहुभ्यांवैराजन्योमैत्रावरुणस्त
स्मादाहमित्रावरुणयोस्त्वाप्रशास्त्रोःप्रशिषायुनज्मी
ति ॥५॥ तंवत्तुर्युञ्जंयुनक्ति । सजघनेनसदोग्नेयाग्नालांव
नेवहृदक्षिणायतितेनप्रतिपद्यतेतंजघनेनचात्वालमग्रे

णाग्नीध्रमुपस्थाछति॥ हुतमातिष्ठति। अथ यथा यैवास्वोधा
येत्वेत्यनार्त्यैहिर्ते वैतदाह यद्दाह यथा येह्यैतेस्वधायेत्वे
तिरस्ताय त्वेत्येवैतदाहारिष्टो अर्जुन इत्यर्जुनो ह वै ना
८ मेंद्रो यदस्य गुह्यं नाम द्वयेन वा एष इंद्रो भवति यद्यद्धोत्रि
यो युद्धवर्जमानस्तस्मादाहारिष्टो अर्जुन इति॥७॥ अ १२०

य दक्षिणायुग्यमुपाषति। मरुतां प्रसवेन जयेति विशो वै
मरुतो विश्यावैतद्धोत्रियो जयति यज्जिगीषति तस्मादाह म
रुतां प्रसवेन जयेति॥८॥ अथ मध्ये गवामुपह्लति। आपा
मम्मनस्येति मनसा वा इदं सर्वमाप्तं तन्मनसैवैतत्स
र्वमाप्नोति तस्मादाहापाम मम्मनसेति॥९॥ अथ धनुरार्तो

Indira Gandhi National Centre for the Arts

गामुपसन्नाति। सुमिंद्रियेणोतीद्रियं वै वीर्यं गाव इंद्रियमेवै
तद्वीर्यमात्मंधत्ते। यद्याहविनामीमाः ऊर्व इमा इति।१७॥ तद्यास्व
स्यगोष्ठघ्नंति। यद्वै सुरूपा सराय्यवति यशो वा किं विद्यास्व
र्ग्ं हैवास्यैतस्रतमामिवान्यपक्रामति तस्मादेवैतादिंद्रियं
वीर्यं पुनरात्मंधत्ते। तस्मात्स्वस्यगोष्ठघ्नंति॥१८॥ तस्मैताव २२१

न्मात्रीर्वा भूयसीर्वा प्रतिददाति। न वा एष क्रूरं कर्मणोत्वव
ति यद्यजमानः क्रूरमिव वा एतत्करोति यदाहविनामीमाः
ऊर्व इमा इति तच्चाहास्यैतदक्रूरं कृतं भवति तस्मात्तावन्मा
त्रीर्वा भूयसीर्वा प्रतिददाति।२२॥ अथ दक्षिणायै ह्वति॥
सयोगेणाकूपं दक्षिणेन वेदिं बानेव दक्षिणां वतितेन प्रति

Indira Gandhi National
Centre for the Arts

पद्यते तंलघुमेनसदोषेणाग्नालाभ्युपछति॥२३॥मातइंद्रते
वयंतुराषाडयुक्तासोऽब्रह्मताविदसामातिष्ठारथम
धियंवज्रहस्तारश्मीदेवयमसेस्वश्वानितिघछत्सवै
तयान्नीशावावैरश्मयस्तस्मादाहारश्मीदेवयमसेस्व १२०
श्वानित्यथरथविमोचनीयानिजुहोतिप्रीतोरथोहिमुच्या

तौइतितस्माद्रथविमोचनीयानिजुहोति॥२४॥सजुहोति
ऽग्नयेगृहपतयेस्वाहेतिसयदेवाग्नेयंरथस्यतद्वै
तेनप्रीणातिवृहावाआग्नेयारथस्यवृहानेवैतेनप्री
णातिश्रीवैगार्हपत्यंयावतोयावतईष्टेतद्धियमेवास्यै
तद्गार्हपत्यंराष्ट्रमन्निविमुच्यते॥२५॥सोमायवनस्पत

Indira Gandhi National
Centre for the Arts

यस्वाहेति। ह्ययानि वै वानस्पत्यानि चक्राणि रथस्यानि वान
सानि वतेन्यान्वैवैतेङ्गयन्यारिष्टं कुरुते सोमो वै वन
स्पतिः स यदेव वानस्पत्यं रथस्य तदेवैतेन प्रीणाति
दारूणि वै वानस्पत्यानि रथस्य दारूण्येवैतेन प्रीणा
ति क्षत्रं वै सोमः क्षत्रमेवास्यैतद्राष्ट्रमभिविमुच्यते ॥१६॥ १२३

मरुतामोजसे स्वाहेति। स यदेव मारुतं रथस्य तदेवैते
न प्रीणाति चत्वारोश्वा रथः पंचमो द्वौ सव्यष्ठसारथी तद्
सप्तसप्त सप्त वै मारुतो गणाः सर्वमेवैतेन रथं प्रीणाति
विशो वै मरुतो विशमेवास्यैतद्राष्ट्रमभिविमुच्यते ॥१७॥
इंद्रस्येन्द्रियाय स्वाहेति। स यदेवैन्द्रं रथस्य तदेवैतेन

Indira Gandhi National
Centre for the Arts

प्रीणाति स यच्छावाएं द्वौरथस्य स यच्छौरमेवैतेन प्रीणाति
द्रियं वै वीर्यमिद्रं इंद्रियमेवास्यैतद्वीर्यं राज्यमतिविमुच्यते
॥१८॥ अथ वाराह्याउपानहाउपमुंचते। नो ह वै देवा घृतकुं
रू भंप्रवेशयां चक्रुस्ततो वराहः संवन्नवतस्माद्वराहो मेदु
रो घृताद्धि संवृतस्तस्माद्वराहे गावः संजानते स्वमेवैतद्र १२४

समन्ति संज्ञानं तेतत्पशूनामुत्तेतद्रूसे पुलितिष्ठति तस्मा
द्वाराह्याउपानहाउपमुंचते ॥१९॥ अथैनं प्रत्यवेक्षमाणो
जपति। पृथिवि मातर्मा मा हिंसीर्मो अहं त्वामिति पुरु
णाद्धवा अन्निषिषिचानात्पृथिवी बिभयां चकार महद्वा
अयमन्तर्द्योऽन्वषेचि यद्वैमायं नावृणीयादिति पुरुणाउहै

दृष्टिः २ श्चैबिल्लयांवकारयद्दैमेयंनावधूर्चीतेतितद्दनुयैवे
तन्मित्रधेयमकुरुतेननहिमातापुत्रंछंहिनस्तिनपुत्रोमात
रं॥२०॥वरुणासवोवाप्षयद्रोड्रास्तूर्याघृषिर्वुहैतस्मा
ह्लित्तिमहह्यात्रयुमन्तुघोन्तृबेवियद्दैमायुंनावदृणीमा
दित्यषुडहास्यैबिभेतियद्दैमेदंनावधूर्चीतेतितदनुयै २२५

वितन्मित्रधेयंकुरुतेनहिमातापुत्रंछंहिनस्तिनपुत्रोमात
रंतस्मादेवेंद्रपति॥२१॥सोवतिष्ठाति हछं सः स्तुविषदूसुरं
तरिदुसह्नोताबेदिषदतिथिर्दुरोणसत्॥नृषद्वरसदृत
सद्योमसदब्जागोजाऋतजाअद्रिजाऋतंबृहदित्य
तामतिछंदसंरूपं नेषावेसवीतिछंदापंसियदतिछं

Indira Gandhi National
Centre for the Arts

दास्तथैवैनं पाप्मानां व्यवतिष्ठति॥२४॥ तत्संग्राहीता व्य
वतिष्ठेत् । नेत्तं लोकमन्ववतिष्ठादिति । सुष्ठु वा एनो व्यवास्था
दिति । सरथमेव रथवाहणमादधाति ततो वाङ्पज
वतेतथ्यातं लोकान्नाव्यवतिष्ठति यदि । सुष्ठु वा एनो व्यवास्था
त्॥२५॥ उत्तरेणाहवनीयं दक्षिणाग्निरुद्धनो भवति । सरथ १२६

वाहणास्य पुदिक्षिणामन्वनुष्यं दक्षिणात मानोपव्रज्यावाबध्ना
ति॥२६॥ औदुंबरीं शाखामुपगृह्णाति । तयोरन्यतरस्मु
पस्पृशाती यदस्या पुरस्या पुरस्या युमे यियधेहि बुदुः शि
व वीषि व यो मियिधेहीति तदापुर्वे वैश्यां संधत्ते॥२७॥ अ
यो दुंबरीं शाखामुपस्पृशाति । ऊर्गस्यूर्जं मयि धेही

Indira Gandhi National
Centre for the Arts

तितद्वुर्द्धमात्मंधत्तेतस्यैतस्यकर्मणएतावेवग्रातमानौप्र
वृत्तौदक्षिणौतौब्रह्मणेददातिब्रह्माहिवर्द्धदक्षिणातोन्निगो
पायुतितस्मात्तौब्रह्मणेददाति॥२६॥त्र्यैणामैत्रावरुण
स्यधिष्ण्यामैत्रावरुणीपयस्यानिहितानवतितामस्य
बाहूऋत्वसुपावहरतीदूसःवांवार्चनृत्तोबाहूऋत्वसुपाव २२७

हरामीतिपश्नंवाएवरसोयत्पयस्यानत्पश्नामेवास्यै
तदूसंबाहूऋत्वसुपावहरतितद्युन्मैत्रावरुणीनवतिमित्रा
वरुणाउह्निबाहूतस्मान्मैत्रावरुणीनवति॥२७॥ब्राह्मणं॥
॥५॥तृतीयःप्रपाठकःसमाप्तः॥कंडिका११६॥ ॥मैत्रावरुण्या
पयस्ययाप्रवरतितस्याऽत्रुनिष्ठएवस्विएरुद्रवत्पप्रा

Indira Gandhi National
Centre for the Arts

स्मा॥स्मा आसंदीमाहरंत्स्फ परिसुद्यं वा एष ऊयति योऽजु यत्संतरिक्षसु
द्यं तु देनमुपस्त्रियानमधस्तादिमाः प्रजा उपासते तस्मादस्मा
आसंदीमाहरंति सैषा खादिरी वितृस्मान्नवति ये यं मुध्र्यमु
तान्नरतान्नां॥१॥ तामुयरेणामैत्रावरुणस्य धिस्त्यं निदधाति।
स्योनासि सुषदासीति वासमेवैतत्कग्मां करोति॥२॥ अथाधी १२८
शि
नासमास्तृणाति। क्षत्रस्य योनिरसीति तद्यैव क्षत्रस्य योनि
स्तामेवैतत्करोति॥३॥ अथैनमासादयति। स्योनामासी
द सुषदामासीदेति शिवामेवैनामासीदेत्येवैतदाह
क्षत्रस्य योनिमासीदेति त[illegible]व क्षत्रस्य योनिस्तस्यामे
वैनमेतद्दधाति॥४॥ अथांतराउं सन्निमृष्टपड्पति। निव

स्मादधृतव्रतंइति धृतव्रतो वैराजा न वा एष सर्वस्माऽइव वदि
तायन सर्वस्माऽइव कर्मणे यदेव साधु वदेद्यत्साधु कुर्यात्त
स्यैवाएषव्रतस्य श्रोत्रियश्चैतौ ह वै द्वौ मनुष्येषु धृतव्रतौ तस्मा
दाह निषसाद धृतव्रत इति वरुणः पस्त्यास्वेति विशो वै प
स्त्या विक्ष्वेवैतदाह साम्राज्याय सुक्रतुरिति राज्यायेत्ये २२८

६ वैतदाह यद्वै साम्राज्याय सुऽक्रतुरिति॥५॥अथास्मै पंचाक्षा
न्पाणावावपति अभिभूरस्येतास्ते पंचदिशः कल्पंतामित्ये
ष वा अयानभिभूर्यत्कलिरेष हि सर्वानयानभिभवति तस्मा
४ ल्प दाहाभिभूरस्येतास्ते पंच दिशः कल्पंतामिति पंच वै दि
शस्तदस्मै सर्वा एव दिशः कल्पयति॥६॥अथैनं पृष्ठत

Indira Gandhi National
Centre for the Arts

स्तूस्तूमेव दंडैर्घ्नंति। तं दंडैर्घ्नंतो दंडवधमतिनयंति तस्मा
द्राजादंड्यो यदेनं दंडवधमतिनयंति॥७॥ अथ वरं वृणीते॥
यः ह वै कं वस्तुष्टुवाणो वरं वृणीते सोस्मै सर्वः समृध्यते
तस्माद्वरं वृणीते॥८॥ स ब्रह्मन्नित्येव प्रथममामंत्रयते॥ ब्र
न्प्रथममन्निव्याहराणि ब्रह्मप्रसूतां वाचं वदानीति २३०

स्माद्ब्रह्मन्नित्येव प्रथममामंत्रयते त्वं ब्रह्मासीतीतरः प्रत्या
ह सवितासि सत्यप्रसव इति वीर्यमेवास्मिन्नेतद्दधाति स
वितारमेव सत्यप्रसवं करोति॥९॥ ब्रह्मन्नित्येव द्वितीय
मामंत्रयते। त्वं ब्रह्मासीतीतरः प्रत्याह वरुणोसि सत्यौजा
इति वीर्यमेवास्मिन्नेतद्दधाति वरुणमेव सत्यौजसं करो

Indira Gandhi National Centre for the Arts

ति॥१०॥ ब्रह्मन्नित्येव तृतीयमामंत्रयते। त्वं ब्रह्मासीतीतरः
प्रत्याहेंद्रोसीन्द्रियं वा इन्द्रियं वीर्यमेवास्मिन्नेतद्दधातीदमेव
विश्वौडसं करोति॥११॥ ब्रह्मन्नित्येव चतुर्थमामंत्रयते। त्वं
ब्रह्मासीतीतरः प्रत्याह रुद्रोसि स्वयोवह्रुतितद्धोर्ष्यमेवास्मि
न्नेतत्सर्वाणि दधात्यथैनमेतत्कमयत्येव तस्मादेवसर्वं १२१

स्येत्यानोमृडयतीत्युदेनं शमयति॥१२॥ ब्रह्मन्नित्येव पं
चममामंत्रयते। त्वं ब्रह्मासीतीतरोऽनिरुक्तं प्रत्याह परि
मितं वै निरुक्तं तत्परिमितमेवास्मिन्नेतत्सर्वं वीर्यं दधात्य
थात्रानिरुक्तं प्रत्याहापरिमितं वा अनिरुक्तं तदपरिमि
तमेवास्मिन्नेतत्सर्वं वीर्यं दधाति तस्मादत्रानिरुक्तं प्र

Indira Gandhi National
Centre for the Arts

स्याह॥१३॥अथ सुमंगलनामानं दूयति। बहुकारश्रेयस्क
र नु यस्करोति षु एवं नामानं वति कल्याणमेवैतन्मानुष्यै
ह्वा वो वदति॥१४॥ अथास्मै ब्राह्मणस्यं प्रयच्छति॥ अध्व
र्युर्वा यो वास्य पुरोहितो नवतीद्रस्य वृत्रोसि तेन मे रध्य १२२
ति वृत्रो वै स्वस्यः स एतेन वृत्रेण ब्राह्मणो राजानमात्मनो

बलीयांसं कुरुते ब्रा वै राजा ब्राह्मणाद् बलीयान् मित्रे
ण्यो वै स बलीयान् भवति तदमित्रेण्स एवैनमेतद्बलीया
ंसं करोति॥१५॥ तं राजा राजभ्रात्रे प्रयच्छति॥ इंद्रस्य
वृत्रोसि तेन मे रध्यतीत्येन राजा राजभ्रातरमात्मनो ब
लीयांसं कुरुते॥१६॥ तं राजा भ्राता स्तताय वा स्थपत

Indira Gandhi National
Centre for the Arts

पेवाग्रुयच्छति। इंद्रस्यवज्रोसितेनमेरध्येतितेनराजन्यात्
सूतंवास्थपतिंवात्मनोबलीयाꣳसंकुरुते॥७॥तंꣳसूतो
वास्थपतिर्वाग्रामण्ये प्रयच्छति। इंद्रस्यवज्रोसितेनमेर
ध्येतितेनसूतोवास्थपतिर्वाग्रामण्यमात्मनोबलीया
ꣳसंकुरुते॥८॥तंग्रामणीः सजातायप्रयच्छति। इंद्रस्यव ९३

ज्रोसितेनमेरध्येतितेनग्रामणीः सजातमात्मनोबलीया
ꣳसंकुरुतेतद्वैदेवꣳसंप्रयुच्छंतेनेत्पापवस्यसमसद्यथा
पूर्वमसदितितस्मादेवꣳसंप्रयच्छंते॥१९॥अथसजा
तश्चप्रतिप्रस्थात्रे। एतेनस्फ्येनस वाग्नीध्रोऽक्षस्यपु
रः रूत्वाधिदेवनंकुरुतेनाविदुक्षोन्तारमेवैतत्कुरुते॥
२०

Indira Gandhi National Centre for the Arts

अथ संचिनः। पुरोरुचा विमितं विमिनुत आद्यो वै संधीतद
न्तारमेवैतत्कृत्वाथास्मा एतदाद्यं जनयत तस्मात्संचिनः पु
रोरुचा विमितं विमिनुतः॥२१॥ अथाध्वर्युः। चतुर्गृहीतमा
ज्यं गृहीत्वाधिदेवने हिरण्यं निधाय जुहोत्यग्निः पृथुर्ध
र्मणस्पतिर्जुषाणो। अग्निः पृथुर्धर्मणस्पतिराज्यस्य वे १३४

तु स्वाहेति॥२२॥ अथाक्षान्निवपति स्वाहाकृताः सूर्यस्य
रश्मिभिर्यतध्वं सजातानां मध्यमेष्ठ्यायेत्येष वा अग्निः
पृथुर्यदधिदेवनं तस्यैतेऽङ्गारा यदक्षास्तमेवैतेन प्रीणा
ति तस्य हवा एषानुमतो गृहेषु हन्यते यो वा राजसूयेन
वृङ्क्ते यो वैतदेवं वेदैतं ह्यसाहं गां दीव्यामीति हवाग्नि

वा होदन्विणा॥२३॥ अथाहाग्नये स्विष्टकृतेनुब्रूहीति। तद्य
दंतरेणाहुती एतत्कर्म क्रियत एष वै प्रजापतिर्य एष यज्ञस्ता
यते यस्मादिमाः प्रजाः प्रजाता एतम्वेवाप्येतर्ह्यनुप्रजायंते
तदेनं मध्यत एव वै तस्य प्रजापतेर्ह्यस्यातिमध्यतः स्तुवंतितस्मा
दंतरेणाहुती एतत्कर्म क्रियत आश्राव्याहाग्निं स्विष्टकृ १२५

तं यजेति वषट्कृते जुहोति॥२४॥ अथेडामुपह्वयति। उपहूता
यामिडायामप्सु उपसृज्य माहेंद्रं ग्रहं गृह्णाति माहेंद्रं
हं ग्रहीत्वा स्तोत्रमुपाकरोति तं स्तोत्रायप्रमीवति स
उपावरोहति सो ते स्तोत्रस्य मवच्युते रास्तुस्या॥२५॥ ॥
आलयां॥ १॥ वुरुणाडवां अनिविषिवानात। नगोपिवको

बोयाः८ इ सः संन्न तोभवति येनैनमेतदभिषिंचति सोऽस्य सर्गेनिर्जयेनानृतम् १

मब्रवीयं वैन्न गीरषाविश्वरूपं वेद्रुः सोऽस्मादपचक्रामन्नाश्वद्य एता
न्निर्द्देवतान्निरनुसूमसर्पत्वा सवित्राप्रसवित्रासुरस्वत्यावा
चात्वष्ट्रारूपैः इरुद्धापश्रुन्निरिंद्रेणास्मैबृहस्पतिनाब्रह्मणा
वरुणेनौजसाग्निनातेजसासोमेनराज्ञाविष्णुनैवदशम्या
देवतयान्वविंदन्॥२॥तद्यदेनमेताभिर्देवताभिरनुसम १२८

सर्पत्वात्तस्मात्सऽर्वसुयोनामायद्वद्वत्रापेहन्सुतोन्नवतितस्मा
हृन्नापेयोंश्योयहुन्नादन्नौकेकंवमसमनुप्रसर्पान्नवंतित
सन्माद्देवदन्नापेयः॥३॥तदाहुः।दन्नापितामहोसोमपांसं
रथायप्रसर्पेन्नथोहास्यसोमपीथमश्नुतेदन्नापेयोही
लितहैद्व्याद्धोत्रीनित्यैवपितामहोसोमपाविंदंतितस्मा

Indira Gandhi National
Centre for the Arts

देताएवदेवताः संख्यायप्रसर्पेत्॥४॥एतानि वैदेवतानि
वेरूणाःएतस्यसोमपीथमाश्नुततथोएवैषएतानिरेवदे
वतानिरंतस्यसोमपीथमश्नुतेतस्मादेताएवदेवताःसं
ख्यायप्रसर्पेद्यद्वदैवेषोदेवसानीयेष्टिःसंतिष्ठतएतस्या १३२
निर्वपनीयस्य॥५॥अथैतानिहावींषिनिर्वपति।सावित्रं

द्वादशाकपालंवाष्टाकपालंवापुरोडाशंसविता वैदेवा
नांप्रसवितासवितृप्रसूतएवतद्धूरुणोनुसमसर्पेत्त
थोएवैषएतत्सवितृप्रसूतएवानुसंसर्पतितत्रैकंपु
डरीकंप्रयच्छति॥६॥अथसारस्वतंचरुंनिर्वपति।वाग्वै
सरस्वतीवाचैवतद्धूरुणोनुसमसर्पत्तथोएवैषएतद्वा

वैवानुसृष्टं सर्पति तत्रैकं पुंडरीकं प्रयच्छति ॥७॥ अथ त्वाष्टं
दशाकपालं पुरोडाशं निर्वपति त्वष्टा वै रूपाणामीष्टे त्वष्टु
वतद्रूपैर्वरुणोनुसृष्टम सर्पति तथा एवैष एतत्त्वष्टुरेव रूपैर
नुसृष्टं सर्पति तत्रैकं पुंडरीकं प्रयच्छति ॥८॥ अथ पौष्णं चरुं नि छ २
र्वपति पशवो वै पूषा पशुभिरेवतद्वरुणोनुसृष्टम सर्प २२०

हस्पतिर्ब्रह्मणोवतद्वरुणोनुसृष्टम सर्पति तथा एवैष एतद्बृह
९॥ अथ बार्हस्पत्यं चरुं निर्वपति ब्रह्म वै बृहस्पतिर्ब्रह्मणो ॥ अथ वारुणं यवमयं चरुं निर्वपति सर्वे वै वरुणेन सम:ऽप
णोवानुसृष्टं सर्पति तत्रैकं पुंडरीकं प्रयच्छति ॥१०॥ अथ वारुणं यवमयं चरुं ... सानुसृष्टं सर्पति तत्रैकं पुंडरी
णो वरुणो गृहीत्वा ... वरुणोनुसृष्टम सर्पति तथा एवैष एतद्वरुणा ... कं प्रयच्छति
तथा एवैष एतत्पशुभिरेवानुसृष्टं सर्पति तत्रैकं पुंडरीकं ५ २१
प्रयच्छति ॥९॥ अथैन्द्रमेकादशकपालं पुरोडाशं निर्वपति
इन्द्रियं वै वीर्यमिन्द्र इन्द्रियेणो वतद्वीर्येण वरुणोनुसृम
सर्पति तथा एवैष एतदिन्द्रियेणो व वीर्येणानुसृष्टं सर्पति
तत्रैकं पुंडरीकं प्रयच्छति ॥१२॥ उपसदो दशाम्या देवता॥

Indira Gandhi National Centre for the Arts

तत्रपुंडरीकाण्युपप्रयन्तीति तां द्वादशपुंडरीकां स्रजं प्र
तिमुंचते सा दीक्षा तया दीक्षयादीक्षत इति॥२३॥ अथ यद्द्वाद
शाभवन्ति। द्वादश वै मासाः संवत्सरस्य सर्वं वै संवत्सरः स
र्वेणैवैनमेतद्दीक्षयति यानि पुंडरीकाणि तानि दिवो रू
पं तानि नक्षत्राणां रूपं येनुधकास्तं तुरिक्षस्य रूपं यानि १३९

बिसानि तान्यस्यैतदेनमेषु लोकेषु अधि दीक्षयति॥२४॥ अथ यद्वारा
ज्ञानं क्रीत्वाहृत्वोपनह्य परिवहंति ततोर्द्धमासं दीक्षामाप्त्वा
द्य प्रवरत्यथ षट्षोद्धा ब्रह्मणो गृहे निहितो भवति तमा
संद्यामासाद्यातिथ्येन प्रवरति यदातिथ्येन प्रवरत्यथो
पसद्भिः प्रवरति यदोपसद्भिः प्रवरति॥२५॥ अथ येतानि

Indira Gandhi National
Centre for the Arts

हवींषि निर्वपति। आग्नेयमष्टाकपालं पुरोडाशं सौम्यं
चरुं वैश्वदेवं त्रिकपालं वा पुरोडाशं चरुं वा तेन यथेष्ट्यैवं य
जेत ॥९॥ तद्धैतद्यथा नु कुर्यात् ॥ द्वलति वा एष यो बहुरूपयादे
त्येति वा एष बहुरूपयाद्युउपसत्यया देति तस्माद्युपसत्य
यादेव नेयात ॥७॥ स ब[illegible]ग्निं यजति। अग्निर्वै तत्तेज १४०

साद्युसं सर्वत्सृष्य यः सोमं यजति सोमेन वै तद्ब्राह्मणत्व स
ं सर्वत्सृष्य यद्धविर्भं यजति ब्रह्मो वेविष्णुस्त्वघहं प्रत्यह
माप्नोति तं प्रत्यहमात्मान्त्वात्म कुरुते ॥१०॥ स एष सप्तदशो
ग्निष्टोमो भवति। सप्तदशो वै प्रजापतिः प्रजापतिर्य
ज्ञस्तद्यज्ञं प्रत्यहमाप्नोति तं प्रत्यहमात्मान्नात्म कुरुते ॥११॥

Indira Gandhi National
Centre for the Arts

तस्य द्वादश प्रथमगर्भाः। षष्ठौह्यो दक्षिणा द्वादश वै मासाः
संवत्सरस्य संवत्सरः प्रजापतिः प्रजापतिर्यज्ञस्तद्यज्ञं प्र
त्यक्षमाप्नोति तं प्रत्यक्षमात्मन्कुरुते ॥२॥ तासां द्वादश
गर्भाः। ताश्चतुर्विंशतिश्चतुर्विंशतिर्वै संवत्सरस्यार्द्ध
मासाः संवत्सरः प्रजापतिः प्रजापतिर्यज्ञस्तद्यं प्रत्यक्षमा २४१
ज्ञं

प्नोति तं प्रत्यक्षमात्मन्कुरुते ॥३॥ ता ब्रह्मणे ददाति ॥
ब्रह्मा हि यज्ञं दक्षिणतोऽभिगोपायति तस्मात्ता ब्रह्मणे ददा
ति हिरण्मयीं स्रजमुद्गात्रे रुक्मं होत्रे हिरण्मयौ प्राका
शावध्वर्युभ्यामश्वं प्रस्तोत्रे वशां मैत्रावरुणाय ऋषभं ब्रा
ह्मणाच्छंसिने वाससी नेष्टापोतृभ्यामन्यतरतोयुक्तं

वाश्वितमश्लावाकाप्यगामग्नीधो॥२४॥तावाएताःद्वादश
वात्रयोदशवादक्षिणाभवंतिद्वादशवावैत्रयोदशवासं
वत्सरस्यमासाःसंवत्सरःप्रजापतिःप्रजापतिर्यज्ञस्तद्य
ज्ञंयत्सरमाप्नोतितंप्रत्यक्षमात्मन्कुरुते॥२५॥ब्राह्मणं॥
॥२॥अध्यायः॥आग्नेयोष्टाकपालःपुरोडाशोभवति॥तंद १४२

वोर्द्धआसादयत्यैंद्रंएकादशकपालःपुरोडाशोभवतिसौ
म्योवाबरुस्तंदक्षिणार्द्धआसादयतित्वैष्टदेवश्चरुर्भवति
तंपश्चार्द्धआसादयतिमैत्रावरुणीपयस्याभवतितामुत्त
रार्द्धआसादयतिबार्हस्पत्यश्चरुर्भवतितंमध्यआसादय
त्यषबरःपंचबिलस्तद्यत्संवहवाछंषिभवंतितेषांपंचबि

Indira Gandhi National
Centre for the Arts

लानितस्माद्बरुःपुंबब्लिलोनाम॥२॥तद्यदेतेनराजसूयया
जीयजतेयद्देवैनंद्विरात्रःसमारोहयतियदेनंन्यक्तोमान्य
छंदाःसितस्माद्देवैनमेतेननिष्क्रीणातिसयद्वैतेनराज
सूययाजीनयजेतोद्वाहमायेस्युवापतेतस्माद्वाएतेनरा १८३
जसूययाजीयजते॥३॥सयदाग्नेयेनाष्टाकपालेनपुरोडा

शेनप्रचरतियद्देवैनंप्रावीद्विरात्रःसमारोहयतियदेनंन्यक्तो
मान्यछंदाःसितस्माद्देवैनमेतेननिष्क्रीणातिसःस्वबुंब
हस्पतेर्वरावुवनयति॥४॥अथयद्दैन्द्रेणएकादशकपाले
नपुरोडाशेनप्रचरतिसौम्येनवावरुणायद्देवैनंदक्षिणाः
द्विरात्रःसमारोहयतियदेतंन्यक्तोमान्यछंदाःसितस्माद्दे

Indira Gandhi National
Centre for the Arts

वैनमेतेनन्निश्रीणाति स ८ स्ववं बार्हस्पत्येवरावुवनयति॥५॥
अथ युद्ध्येवदेवेनवरुणाप्रवुरति। यदेवैनंप्रतीचीदिश ८
समारोहयति युद्रसंच्यस्तोमान्यकुंदा ८ तस्मादुवेनमेते सि ३
नन्निश्रीणाति सर्यै ८ स्ववं बार्हस्पत्येव यै वबुनयति॥५॥मु १४४
यथुन्मैत्रावरुण्यापयस्यया प्रवुरति। यदेवैनमुदीचीदि

श ८ समारोहयति युद्ध्रनयस्तोमान्यछंदा ८ सि तस्मादुवैनं
मेतेननिश्रीणाति स ८ स्ववं बार्हस्पत्येचरावुवनयति तद्यु
स ८ स्ववं बार्हस्पत्येचरावववनयति सर्वं तएवास्मिन्नेतु
दं नाद्यं दधाति तस्मादुदिच्यो दिश एव राज्ञे नाद्यमभिह्रिय
ते॥६॥ अथयद्बार्हस्पत्येनवरुणाप्रवुरति। यदेवैनमूर्ध्वां

दित्राः समारोहयति यदहं न्यस्तो मान्यकुंदाः सितस्मा
दुवैनमेतेनानिःक्रीणाति ॥७॥ स यदेष आग्नेयोष्टाकपालः
पुरोडाशो भवति । तस्य हिरण्यं दक्षिणाग्नेयो वा एष यज्ञो
भवत्यग्नेरेतो हिरण्यं तस्माद्धिरण्यं दक्षिणा तदग्नीधे ददा १६५
त्यग्निर्वा एष निदानेन यदाग्नीध्रस्तस्मात्तदग्नीधे ददाति ॥८॥

अथ य एष ऐंद्रः एकादशकपालः पुरोडाशो भवति तस्यर्ष
भो दक्षिणा स ह्यैंद्रो यदृषभो यद्य सौम्यश्चरुर्भवति तस्य ब
भ्रुर्गौर्दक्षिणा स हि सौम्यो यद्बभ्रुस्तं ब्रह्मणे ददाति ब्रह्मा
हि ब्रह्मं यद्दक्षिणतो निगोपायति तस्मात्तं ब्रह्मणे ददाति ॥९॥
अथ य एष वैश्वदेवश्चरुर्भवति तस्य पृषन् गौर्दक्षिणा भू
मा वा एतद्रूपाणां यत्पृषतो गोर्विशो वि वै विश्वेदेवाः

Indira Gandhi National
Centre for the Arts

मो वै विद्वस्मात्सु यजो हि दक्षिणा तं होत्रे ददाति होता हि भूमा
तस्मात्तं होत्रे ददाति ॥१०॥ अथ येषां मैत्रावरुणी पयस्या
भवति। तस्यै वशा दक्षिणा सा हि मैत्रावरुणी यद्वशा यदु
दिवशां न विंदेदपि ये वकाव्यप्रवीता स्यात्सर्वो हि वै वशा
प्रवीता तामध्वर्युभ्यां ददाति प्राणोदानौ वा अध्वर्यू प्राणो २८६
दानौ मित्रावरुणौ तस्मात्तामध्वर्युभ्यां ददाति ॥११॥ अथ

तं ब्रह्मणे ददाति बृहस्पतिर्वै देवानां ब्रह्मा एतस्य ... भवति तस्मा

स एष बार्हस्पत्यश्चरुर्भवति। तस्य शितिपृष्ठो गौर्दक्षिणोर्ध्वा ह्ये षा
षा बृहस्पतेर्दिक्तदेष उपरिष्टादर्यम्णः पंथास्तस्माच्छितिपृ
ष्ठो बार्हस्पत्यस्य दक्षिणा तं ब्रह्मणे ददाति स ह तेनापि विशि
प ष्टाऽर्थं नाद्यकामो यजेत तदस्मिन्सर्वतोऽन्नाद्यं दधाति स हान्ना
द एव भवति ॥१२॥ ब्राह्मणं ॥३॥ स वै प्रयुजां हविर्भिर्यजते
तद्यत्प्रयुजां हविर्भिर्यजत ऋतवो वा एतं सुषुवाणं प्रयुञ्जते

तएनमृतवोयुक्ताव्रहंस्तद्वाप्रयुक्तानन्नुचरतितस्मात्प्रयुजाꣳह
विर्निर्भजते॥२॥तानिवैद्वादशाञ्चवंति॥द्वादशवैमासाःसंवत्सरस्य
तस्माद्द्वादशाञ्चवंतिमासिमासियजेतुल्याद्भुःकोवेदमनुष्यस्य
तस्मान्नमासिमासियजेतशम्यापराव्याधेशम्यापराव्याधः
एवषड्भिर्यजतेप्राञ्ज्ञानथपुनरावर्त्तःशम्यापराव्याधेशम्याप
१ श्री राधःएवषड्भिर्यजते॥२॥तद्वैतथानकुर्यात॥षड्वैतानिधूर्वा॰ १८७

पि॰हवीꣳषिनिर्वपतिसमानुबर्हीꣳषितासांदेवतानांꣳरूपंयथा
शिशिरेयुक्ताःप्रावत्सापाप्रावषंयायुस्तत्षड्भर्त्तुमद्भेतएनꣳषड्
ऋतवोयुक्ताःप्रावत्सापाप्रावषंवहंतिषड्डुर्त्तुन्युयुक्तानाप्रावषमृतु
वरतिपर्वाग्निवाहांद्वौदक्षिणा॥३॥षडेवात्रराणिहवीꣳषिनिर्व
पति॥समानुबर्हीꣳषितासांदेवतानांꣳरूपंयथापुनरावर्त्ते
रन्वार्षिकमन्वितषड्भर्त्तुन्युङ्क्ते॰तएनꣳषड्ऋतवोयुक्तावार्षिकम

Indira Gandhi National Centre for the Arts

त्रिवहंतिषड्वर्त्तस्युयुक्ताद्वार्षिकमनुवरतिसर्वाग्निवाहाद्दौदुग्धि
णातघृतस्सर्वाग्निवाहोदुग्धिणा र्द्वाएतस्यपुकालोयुङ्क्ते वहं
तिवाऽनड्वाहस्तस्मात्सर्वाग्निवाहोदक्षिणा॥४॥तद्धस्मैतत्पु
राकुरुपंचालाआहुः॥स्तवोवाअस्मानयुक्ताबहंत्स्वतुंन्नाम
युक्तानन्वरामइतिबुदेषांराज्ञानोराजस्यययाजिनआसु २४८
स्तेस्मैतदाहुः॥५॥आग्नेयोष्टाकपालःपुरोडाशोभवति॥
स्तुर्दे

सौम्यश्चरुःसावित्रोद्वादशकपालोवाष्टाकपालोवापुरोडाशोवा
र्हस्पत्यश्चरुस्त्वाष्ट्रोदशाकपालःपुरोडाशोवैश्वानरोद्वादशाक
पालएतानिषड्वीणिहवींषिभवंति॥६॥अथप्र०दद्॥रा तरं२०
षडेवोत्तरेवरवः॥सारस्वतश्चरुःपौष्णश्चरुर्मैत्रश्चरुःक्षेत्र
पत्यश्चरुर्वारुणश्चरुरादित्यश्चरुरेतउषड्त्तरेवरवः॥७॥त्र्य
यस्तेपनीविविक्तगर्त्तां।आदित्याआलभन्तेतस्यापछेवाव्द्याप्ता

पथ्यैवस्त्यायाइयंवा अदितिरस्याएवैनमेतद्गर्भंकरोतितस्मा
एतादृग्रूपेवद्रूपेनाविविक्तगर्भोदक्षिणा॥८॥अथपृषतीविवि
क्तगर्भा।मरुद्भ्यआलभंतेतस्याएषैवावृद्धिर्योवैमरुतोवि
शामेवैनमेतद्गर्भंकरोतितस्याएतादृग्रूपैवपृषतीविविक्तग
र्भोदक्षिणा॥९॥एतौपशुबंधौ।तदेतावेवसंतावन्यथेवालभं ५९
तेषामुदित्याआलभंतआदित्येभ्यस्तामालभंतेसर्वं वैतन्ना

दित्याःसर्वस्यैवैनमेतद्गर्भंकरोति॥मरुद्भ्यआलभंतेविश्वे
भ्यस्तांदेवेभ्यआलभंतेसर्वं वैविश्वेदेवाःसर्वस्यैवैनमेतद्ग
र्भंकरोति॥१०॥ब्राह्मणं॥४॥अग्निर्वैवनीयेनेष्ट्वा।केशान्नव
पतेतद्यत्केशान्नवपतेन्नवीर्यंवातदपांरसःसंभृतोभवति ९१
मुनैनमेतदग्निर्बिभर्तितस्मान्निषिक्तस्यकेशाःप्रथमाप्रा
ज्ञोतिसयत्केशान्वपतेतांश्रियंजिहासेद्विनाशायेद्यदुह्या

तस्मात्केशान्नवपते॥१॥संवत्सरंनोपवैते॥संवत्सरसंमितावै
व्रतंवै तस्मात्संवत्सरंनोपवैते सएषव्रतविसर्जनीयोपप्रयो
गोनुष्टुप्स्तोमोभवतिकेशवपनीयः॥२॥तस्यैकविंशंप्रातः
सवनंसप्तदशंमाध्यंदिनंसवनंपंचदशंतृतीयसवनं
सहोक्थैःसहषोडशिनासहरात्र्या॥३॥त्रिवृद्राथंतरःसंधि
र्भवति।एषएवैकविंशोयएषतपतिसएतस्मादेकविंशा १५०

दुपयुज्ये।ससप्तदशमभिप्रसवैतिसप्तदशात्पंचदशंपंचदशा
दस्यामेवत्रिवृतिप्रतिष्ठायांप्रतितिष्ठति॥४॥तस्यरथंतरंपृ
ष्ठंभवति।इयंवैरथंतरमस्यामेवैतत्प्रतिष्ठायांप्रतितिष्ठ
त्यतिरात्रोभवतिप्रतिष्ठावाअतिरात्रस्तस्मादतिरात्रोभवति
॥५॥सवैन्यवर्तयते।केशान्नवपतेवीर्यंवाएतद्रूपंरसः
संभृतोभवतियेनैनमेतदभिषिंचतितस्मादभिषिक्तस्यके

रान्प्रथमान्प्राप्नोतिसयकेशान्वापतेताᳫंश्रियंजिह्मांविनाशयेद्ध
डुल्याद्दुघर्षंनिवर्त्तयतेतदात्मन्यैवेताᳫंश्रियंनियुनक्तितस्मान्ये
वुह्वर्त्तमतेकेशान्नवपतेतस्यैषैवब्रह्मतवर्यान्नवतियावज्जीवंना
स्यांप्रतितिष्ठति॥६॥आसंद्याउपानहाउपमुंचतेउपानह्यामधि
यदस्ययानंभवतिरथोवाकिंविद्वान्सर्वेवारवश्वइदमनुपर्युपरि
भवतस्यवाणावास्मादिदंसर्वंभवतियोराजसूयेनयजतेतस्मा ५१

दस्यैषैवब्रह्मतवर्यान्नवतियावज्जीवंनास्यांप्रतितिष्ठति॥७॥आह
र्त्ता॥८॥रूपतआश्विनोभवति।रूपतावित्रह्याश्विनायविदेमम
न्त्रासारस्वतीमवत्स्पपञ्चमिंद्रायसुत्राम्णऽआलभतेडुर्वेदा
ह्रैन्द्रंसमृद्धःपन्नावोयद्देवंसमृद्धंनविदेदघ्यज्ञानेवाल
नेरंस्तोहिसुत्रप्रपतरान्भवंतिसयद्यज्ञानालुभेरंलोहितत्रया
श्विनोभवतितद्धदेतयायजते॥१॥त्वष्टुर्हवैपुत्रः।त्रिशीर्षा

Indira Gandhi National Centre for the Arts

षडक्ष आस तस्मात्त्रीण्येव मुखान्यासुस्तद्यदेवंरूप आस तस्मा
द्विश्वरूपो नाम॥२॥ तस्य सोमपानमेवैकं मुखमास सुरापाण
मेकमन्यस्मा अशनायैकं तमिंद्रो दिद्वेष तस्य तानि शीर्षाणि
प्रचिच्छेद॥३॥ स यत्सोमपानमास ततः कपिंजलः समभवत्त
स्मात्स बभ्रुक इव बभ्रुरिव हि सोमो राजा॥४॥ अथ यत्सुरापा २१२
णमास ततः कलविंकः समभवत्तस्मात्सोऽभिमाद्यत्क इव वद

त्यभिमाद्यन्निव हि सुरां पीत्वा वदति॥५॥ अथ यदन्यस्मा अश
नायास ततस्तित्तिरिः समभवत्तस्मात्स विश्वरूपतम इव संत्ये
व घृतस्तोका इव त्वन्मधुस्तोका इव त्वत्पर्णेष्वाश्चुतिता एवंरू
पमिव हि स तेनाशनमावयत्॥६॥ स त्वष्टा चुक्रोध कुविन्मे पु
त्रमवधीदिति सोऽपेंद्रमेव सोममाजह्रे स यथायं सोमः प्रसु
त एवमपेंद्र एवास॥७॥ इंद्रो ह वा ईक्षां चक्रे इदं वै मा सोमादंतर्य

Indira Gandhi National Centre for the Arts

तीतिसयथाबलीयानबलीयसएवमनुपद्यतएवमोद्रोणाकल
शोस्मुक्त्र्यासतंन्नदृयांवकारसादेनाद्धिहिऽंससोस्याद्विष्टं३
वुप्राणोन्योद्रुद्रावसुखाद्धैवास्यानदुद्रावसोस्मात्प्रायश्चित्तिरा
ससयद्धापिमुखाद्द्रोष्यनुद्देवप्रायश्चित्तिरन्नविष्यत॥ज॥
वद्वारोवैवर्णाः।ब्राह्मणोराजन्योवैश्यःशूद्रोनहैतेषामेकश्चन
न्नवतिषःसोमंवमतिसयद्धैतेषामेकश्चिश्यात्स्याद्धैवप्रायश्चि २५३

स्त्रिः॥९॥सर्वेनस्तोद्रुवत्।ततःसिंहःसमभवद्यल्लोमाम
द्रुवत्ततोवृकःसमभवदथयदवावःप्राणाद्द्रुवत्ततःशार्दूलज्ये
ष्ठाःश्वापदाःसमभवन्नथयदुत्तरास्मात्प्राणाद्द्रुवत्सापरिस्रुदथ
त्रिर्निरष्ठीवत्ततःकुवलंकर्कन्धुवदरमितिसमभवत्ससर्वेणै
वव्यार्धीतसर्वंहिसोमः॥१०॥ससोमातिपूतोमंक्रुरिवचचा
रातमेतयाश्विनावभिषज्यतांतंसर्वेणैवसमार्द्धयताऽंस

Indira Gandhi National Centre for the Arts

र्वं हि सोमः स वसीयानेव भूत्वा भवति ॥११॥ ते देवा अब्रुवन् सुत्रा
तं वतैनमत्रासामहा इति तस्मात्सौत्रामणी नाम ॥१२॥ स हैतया
पि सोमातिपूतं भिषज्येत् सर्वाणि वा एष भूतान्यपक्रामति यं सोमोऽति
पवते सर्वं हि सोमस्तं सर्वेणैव समर्द्धयति सर्वं हि सोमः
स वसीयानेव भूत्वा भवति तस्माद्धैतयापि सोमातिपूतं भिष
ज्येत् ॥१३॥ तद्यदेतया राजसूययाजी यजते । सर्वो वा एष यज्ञक्र २५४

तून्वरुन्धे सर्वा इष्टीरपि दर्विहोमान्यो राजसूयेन यजते देवसृष्टो
वा एषेष्टिर्यत्सौत्रामण्येतया मे पीष्टमसदनयापि सूया इति तस्मा
द्वा एतया राजसूययाजी यजते ॥१४॥ अथ यदाश्विनो भवति । अ
श्विनौ वा एनमभिषज्यतां तथो एवैनमेष एवैतदश्विभ्यामेव
भिषज्यति तस्मादाश्विनो भवति ॥१५॥ अथ यत्सारस्वतो भव
ति । वाग्वै सरस्वती वाचा वा एनमश्विनावभिषज्यतां तथो एवै

Indira Gandhi National
Centre for the Arts

नमेषुएतद्वावैवृत्निदधातितस्मान्मेषःसारस्वतोभवति॥२६॥ऋषभ
ऐंद्रोभवतिइंद्रोवैयज्ञस्यदेवतासायैवयज्ञस्यदेवतातयैवैन
मेतद्विदधातितस्मादैंद्रोभवति॥२७॥एतेषुपशुषु।सिंहलोमानि लो
वृकलोमानिशार्दूललोमानीत्यावपत्योतद्वैततःसमभवद्यदे
नंसोमोऽत्यपवततेनैवैनमेतत्समर्द्धयतिकृत्स्नंकरोतितस्मा
देतान्यावपति॥२८॥तद्धैतद्ध्यानकृषीत।उल्कयादहेन्नखिन्याप १५५

स्नन्नुप्लुवातियएतानिपशुष्वावपतितस्मादुपरिष्टादेवावपेन्न
ध्योहोल्कयानखिन्यापशून्नानुप्लुवतितथोएवैनंसमर्द्धयति
कृत्स्नंकरोतितस्मादुपरिष्टादेवावपेत्॥२९॥अथयत्रवैतत्
परिस्रुतंसंदधतितत्क्षिप्रंस्यात्पयस्वसुरस्वयैपयस्वेंद्राय
सुत्राम्णेपयस्वेतिसायदापरिस्रुद्भवत्यथैनयात्रवरति॥२०॥
ह्वावग्नीउद्धरतिउत्तरवेदावेवान्तरंमुद्धतेदक्षिणांनेसोमाङ्गतु

श्वस्तुराङ्कताश्च सहतुहत्वामेतितस्मादुवगीऽहुरंस्फत्तरवेदावेवो
त्तरमुद्धतेदक्षिणांमुश्च यदावपान्तिः प्रवुरंत्यश्चेतयापरिस्रुता
प्रवरति॥२१॥तांदशभिः पावयंति।पूतो सदिति वायुः पूतः पवि
त्रेण प्रत्यङ्क्सोमो ऽतिस्रुतः।इन्द्रस्य युज्यः सखेतितकुवलस
कृत्वकर्द्धिधुसकृत्वदरसकृन्नित्यावयत्येतद्वैततः सुमन्नवद्याद
त्रीनिरुक्षावन्तेनैवैनमेतत्सुमर्द्धयतिकृत्स्नंकरोतितस्मादेतान्।२५६

वपति॥२२॥उपांशुग्रहान्गृह्णाति।एकंवाऽत्रीन्वेकुस्त्वेवग्रहीतव्य
ऽमुं।हिपुरोरुग्ववत्येकानुवाक्यैकायाज्यातस्मादेक एवग्रही
तव्यः॥२३॥सगृह्णाति।कविदंगस्यवमंतोयवंवियुयथादांस
नुपूर्वंवियूय॥इहेहैषांकृणुहिभोजनानियेबर्हिषोनमउक्तिं
युजंति॥उपयामगृहीतोऽस्यश्विभ्यांत्वासुरस्वत्यैत्वेंद्रायत्वा
सुत्राम्णऽइतियद्यश्वीन्गृह्णीयादेतयैवगृह्णीयादुपयामैरे

Indira Gandhi National
Centre for the Arts

तार्हिं नानाग्नीध्रीयादुथा हाश्विना ॐ सरस्वत्या इंद्राय सुत्राम्णे ज
हीति॥२४॥ सो ब्राह॥ युवं सुराममश्विना नमुचावासुरे सचा॥ वि
पिपाना शुभस्पती इंद्रं कर्मस्वावतमित्याश्विन्या हाश्विनौ सरस्व
तामिंद्रं सुत्रामाणं घडोति॥२५॥ सयजति पुत्रमिव पितराव
श्विनोभेंद्रावथुः काव्यैर्दंसनाभिः॥ यत्सुरामं व्यपिबः शची
भिः सरस्वती त्वा मघवन्नभिष्णगिति हि होता वषट्करोति द्विर २५१

[illegible]

धयुर्द्वैहोत्या हरति नचं यद्यत्रीनाग्नीध्रीयादेतस्यैवानुहोमभि
तरौह्यपेते॥२६॥ अथ कुंभः शतवितृण्णो वा भवति नववितृण्णो
वा सयदि शतवितृण्णः शतायुर्वा अयं पुरुषः प्राणास्तस्मान्न
ववितृण्णः॥२७॥ तं शिक्योद्धृतं उपरि पर्याहवनीयं धारयंति
स्याधापरिशिष्टा परिस्कंद्भवति तामासिंचति तां विहरंतामु
पतिष्ठते पितृणां सोमवतामिति सानिरौग्निः पितृणां बर्हिषदां

तिसृभिर्सोमैः पितृणामग्निष्वात्तानां तिसृभिः सोमैस्तद्यु देवसु
प्रतिष्ठते यत्रो वि सोम इंद्रमत्युपवत स यत्सितुनगकत्रयावैप
तस्तेनैवैनमेतत्समर्द्धयति । कृत्स्नं करोति तस्माद्देवसूपत्ति
ष्ठते ॥ २८ ॥ अथ यैतानि हवीᳩषि निर्वपति । सावित्रं द्वादशकपा
द्वाक पालं लं वा पुरोडाशं वारुणं यवमयं चरुमैंद्रमेकादशकपालं १५८
पुरोडाशᳪ ॥ २९ ॥ स यत्सावित्रो भवति । सविता वै देवानां प्र

सविता सवितृप्रसूत एवैतद्भिषज्यति तस्मात्सावित्रो भवति ॥ ३० ॥
अथ यद्वारुणो भवति । वरुणो वा आर्पयिता तद्य एवार्पयिता ते
नैवैतद्भिषज्यति तस्माद्वारुणो भवति ॥ ३१ ॥ अथ यदैंद्रो भवति ॥
इंद्रो वै यज्ञस्य देवता । सा यैव यज्ञस्य देवता तयैवैतद्भिषज्य
ति तस्मादैंद्रो भवति ॥ ३२ ॥ स यदि हैतयापि सोमातिपूतं भिष
ज्येत् । इष्ट्वाप्येन याज्ञानुवत्समृद्धस्त्रुवावयैतैर्हविर्भिः पुनर

Indira Gandhi National Centre for the Arts

तिपश्चाद्वै सोम्यतिष्ठव ते पश्चाद्देवैनमेतु नमेध्रेनापिदधात्या
ग्नि तस्मु तार्हि द्विकपालं पुरोडाशं निर्वपेद्यद्वाग्निः प्र
वुरंस्तु ष्टे तेनाग्निनेन द्विकपालेन पुरोडाशेन प्रचरति ॥२३॥ तद्धुत
यानकुर्वीत। द्धलतिवाएष यो यज्ञपश्चादेसेति वाएष यज्ञपथा
द्यएवं करोति तस्माद्युत्रै वै सैधांपशूनां व पाग्निः प्रचुरंतितद्दैवै २५६
तैर्हविर्भिः प्रचरेयुनोतिस्यौग्निनं द्विकपालं पुरोडाशं निर्वपेत ॥२४॥

२

तस्य न पुंसको गो दक्षिणा। न वा एष स्त्री न पुमान्यं न पुंसको
गो यदह पुमांस्तेन न स्त्री यदु स्त्री तेनो न पुमांस्तस्मान्न पुंस
को गौर्दक्षिणाश्वावारथवाही सा हि न स्त्री न पुमान्यदश्वारथ
वाही वदह रथं वहति तेन न स्त्री यदु स्त्री तेनो न पुमांस्तस्मा
दश्वारथवाही दक्षिणा ॥२५॥ ब्राह्मणं ॥३॥ ऐंद्राग्नं वैकादश
कपालं पुरोडाशं निर्वपति। तद्यदेतया यजते वृत्रे ह वा इ

Indira Gandhi National
Centre for the Arts

दमग्रे सर्वमास यद्दवोवद्युज्ञं विय यत्सामानि तस्मादिंद्रो वृ
त्रंघ्नं जिहीर्षत ॥१॥ सह विश्वामित्रमुवाच ॥ वृत्राय वै वज्रं प्रहरिष्यं
म्यनुमातिष्ठस्वेति तिष्ठेति ह विश्वामित्र उवाचानुत्वा स्थास्ये प्रहरेति
ज॰ ३ तस्मादिंद्रो वृ[illegible]मुद्ययाम स ऽ उद्यता इन्द्राद्ध्वं चो बिन्नयाञ्चकार
॥२॥ स होवाचास्ति वा इदं वीर्यं तन्नु ते प्रयच्छानि मा नु मे प्र नि
हार्षीरिति तस्मै यजूंषि प्रायच्छत् तस्मै द्वितीयमुद्ययाम ॥३॥ २६०

स होवाचास्ति वा इदं वीर्यं तन्नु ते प्रयच्छानि मा नु मे प्रहार्षी
रिति तस्मा ऋचः प्रायच्छत् तस्मै तृतीयमुद्ययाम ॥४॥ स होवाच
अस्ति वा इदं वीर्यं तन्नु ते प्रयच्छानि मा नु मे प्रहर्षीरिति तस्मै सा
मानि प्रायच्छत् तस्मादप्येतर्ह्येवमेवैतैर्वेदैर्यदिदं तद्वृतेषु कुर्विरे
वाग्रेय ग्निरथ सामभिर्नि रे वद्यस्मा एतत्सा प्रायच्छत ॥५॥ तस्य
घोषो निराहायन्नास । तमनु परामृश्य संतृप्याच्छिंत सैषे

Indira Gandhi National Centre for the Arts

रैन्नवत्तद्यादत्तस्मिन्नाशायेत्त्रिधातुरिवैषाविद्याशेतत्तस्मा
त्रैधातवीनाम॥६॥अथयदैंद्राग्नवृंहविर्भवतीइंद्राग्नीहि
त्वजमुदयच्छंस्तमनुतिष्ठत॥७॥अथयद्द्वादशकपालोभ
वति।द्वादशावैमासाःसंवत्सरस्यसंवत्सरसंमितैषेष्टि
स्तस्माद्द्वादशकपालोभवति॥८॥तमुत्तरयेषांव्रीहियवाणांग
यतितद्यदुषाठंरूपम् २६१
क्नाति।व्रीहिमयंस्वायेपिडमधिश्रयति

यथवमुयंतुदवाठंरूपमथव्रीहिमयंतस्मात्ठंरूपंतदेत
त्रयीविद्यायैरूपंक्रियतेसैषाशांडस्यर्ययाडिनदवसा
नायेष्टिर्भवति॥९॥सर्वोह्याएषयज्ञक्रतुंनवरुंधे।सर्वाइष्टी
रपिदर्विहोमान्योशांडस्यर्येनयजतेतस्ययातयामेवयज्ञो
भवतिसोस्मात्पराङिवत्तवत्पेतावान्वैसर्वोयज्ञोयावानेषु

त्रीणि

Indira Gandhi National
Centre for the Arts

त्रयोवेदस्तस्यैतद्रूपंक्रियतएषवोनिराम्नायस्तदेतेनत्रयेण
वेदेनपुनर्यज्ञमारभन्ततेतथास्यायातयामायज्ञोभवतितथो
अस्मान्नपराङ्भवति॥१०॥सर्वान्वाएषयज्ञक्रतूनवरुंधे।स
र्वादृष्टीरपिदर्विहोमान्योराजसूयेनयजतेदेवसृष्टोवाए
षेष्टिर्यत्त्रैधातव्यनयामेपाष्टमसदनयापिसृयाद्दुतितस्मा १६२

द्वाएषाराजसूयस्ययाज्ञिनउदवसानीयेष्टिर्भवति॥११॥त्रयो
षःसहस्रंवाभूयोवादद्यात्तस्यहाप्युदवसानीयास्या
द्रिरिचानइववाएषभवतियःसहस्रंवाभूयोवाददासेत
हैसहस्रंवावःप्रजातंवदेषत्रयोवेदस्तसहस्रेणारिरिचा
नंपुनराप्याययतितस्माद्दुहतस्याप्युदवसानीयास्यात्॥१२॥

Indira Gandhi National
Centre for the Arts

अथो ये दीर्घसत्रमासीरन् । संवत्सरं वा भूयो वा तेषां हाप्यु
दवसानीया स्यात् सर्वं वै तेषामाप्तं भवति सर्वं जितं ये दीर्घसत्र तर
मासते संवत्सरं वा भूयो वा सर्वमेषा तस्मादु ह तेषामप्यु
दवसानीया स्यात् ॥१३॥ अथो हैनया पाप्मनि वरेत । एतया
वैन्द्र सेनमाजातत्राणत्वमारत्नोरत्निववारम्हिप्रंकिलास्र १६२

ति
णुत्रे ह स्माह याज्ञवल्क्योपि ह वा एनयेन्द्रो वृत्रस्यास्थानम
छिनदपि ह वा एनया स्थानं छिनत्ति य एनयाभिचरति तस्मा
दु हैनया पाप्मनि वरेत ॥१४॥ अथो हैनया । पितृनिषद्धेत । यद्वै
वैकस्य पितृनिषद्धोदुकेन वयुष्धिकेन साम्नातन्वे वागदंके
यो किमु संत्रयेत वेदेन तस्मादु हैनया पितृनिषद्धेत ॥१५॥

Indira Gandhi National
Centre for the Arts

तस्यै त्रीणि शतमानानि हिरण्यानि दक्षिणा तानि ब्रह्मणे द
दाति न वै ब्रह्मा प्रवरति न स्तुते न शंसत्यथ यशसा न वै
हिरण्येन किंचन कुर्वन्त्यथ तद्यशस्तस्मात्त्रीणि शतमान
हिरण्यानि ब्रह्मणे ददाति ॥१६॥ तिस्रो धेनूर्होत्रे। भूमा वै तिस्रो धे
नवो भूमा होता तस्मात्तिस्रो धेनूर्होत्रे ॥१७॥ त्रीणि वासांसि २६४

स्यध्वर्यवे तन्तुर्वै वाससोऽध्वर्युर्यज्ञं तन्वते वासांसि तस्मात्त्री
५ णि वासांस्यध्वर्यवे गामग्नीधे ॥१८॥ ता वा एताः द्वादश वा
त्रयोदश वा दक्षिणा भवन्ति द्वादश वा वै त्रयोदश वा संवत्स
रस्य मासाः संवत्सरसंमितैषेष्टिस्तस्माद्द्वादश वा त्रयोद
श वा दक्षिणा भवन्ति ॥१९॥ ब्राह्मणं ॥७॥ ॥ चतुर्थः प्रपाठकः ॥ ६ ॥
॥ शुभमस्तु ॥ षड्विंशब्राह्मणं समाप्तः ॥ = संवत् ॥

२५२

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ॥ यदि शुद्धमशुद्धं वा
मम दोषो न दीयतां ॥

॥ जांना गोपालस्येदं पुस्तकं ॥

॥ स्तवकां इ पंचम्यं चतुर्थ प्रपठकः ॥ ५ ॥

सा० जी० क० ५